"रवौ वायुः सुदुःस्पर्शः फूत्कारानीरयन् मुहुः।
उन्मूलयन्नगपतीन् वात्यानीको रथध्वजः ॥")

दुःस्पर्शा, स्त्री, (दुःखेन स्पृश्यते इति। स्पृश्+खल्+टाप् च।) कपिकच्छुः। आकाशवल्ली। कण्टकारी। (अस्याः पर्य्याया यथा,—

"कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका।
कण्टालिका कण्टकिनी धावनी बृहती तथा ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

दुरालभा। इति राजनिर्घण्टः ॥

दुःस्फोटः, पुं, (दुर्दृष्टं स्फोटयतीति। स्फोटि+अच्।) शस्त्रभेदः। इति हेमचन्द्रः। ३। ४५१ ॥

दुकूलं, क्ली, (दुष्टं कूलनि आवृणोतीति। कूल+"इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः। पृषोदरात् साधुः। यद्वा, दु+"खजिपिञ्जादिभ्य उरोलोचौ।" उणां। ४। ९०। इति ऊलच्। धातोः कुक् च।) क्षौमवस्त्रम्। (यथा, रघौ। ७। १९।

"दुकूलवासाः स वधूसमीपं
निन्ये विनीतैरवरोधरक्षैः ॥")

सूक्ष्मवस्त्रम्। इति मेदिनी। ले, ९९ ॥

दुगूलम्, क्ली, (दुकूलं पृषोदरात् कस्य गः।) दुकूलम्। पट्टवस्त्रम्। इति हेमचन्द्रः। ३। ३३३ ॥

दुग्धम्, क्ली, (दुह्यते स्मेति। दुह+कर्म्मणि क्तः।) स्त्रीजातिस्तननिःसृतद्रवद्रव्यविशेषः। दुध इति भाषा। तत्पर्य्यायः। क्षीरम् २ पीयूषम् ३ ऊधस्यम् ४ स्तन्यम् ५ पयः ६ अमृतम् ७। इति राजनिर्घण्टः ॥ बालजीवनम् ८। इति भावप्रकाशः ॥ अस्य सामान्यगुणाः। स्वादुरसत्वम्। स्निग्धत्वम्। ओजःकारित्वम्। धातुवर्द्धनत्वम्। वातपित्तहरत्वम्। वृष्यत्वम्। श्लेष्मलत्वम्। गुरुत्वम्। शीतलत्वम्। पिष्टकादृष्टगुणगुरुत्वञ्च ॥ * ॥ गोदुग्धगुणाः। प्राणद रक्तत्वम्। वलायुःपुरुषत्वशुक्रकारित्वम्। मेध्यत्वम्। रक्तपित्तरोगवायुनाशित्वम्। रसायनत्वञ्च ॥*॥ छागीदुग्धगुणाः। मधुरत्वम्। शीतत्वम्। मलबन्धाग्निकारित्वम्। रक्तपित्तविकारश्वासकाससर्व्वदोषनाशित्वञ्च ॥ * ॥ मेषीदुग्धगुणाः। गुरुत्वम्। स्वादुत्वम्। स्निग्धत्वम्। उष्णत्वम्। कफपित्तनाशित्वञ्च ॥ * ॥ माहिषदुग्धगुणाः। अतिस्निग्धत्वम्। निद्राकारित्वम्। अग्निनाशित्वञ्च ॥ * ॥ उष्ट्रीदुग्धगुणाः। रूक्षत्वम्। उष्णत्वम्। शोथवातकफनाशित्वम् ॥ * ॥ अश्वादुग्धगुणाः। सलवणत्वम्। मधुराम्लरसत्वम्। लघुत्वञ्च ॥ * ॥ हस्तिनीदुग्धगुणाः। मधुरत्वम्। शुक्रकारित्वम्। कषायानुरसत्वम्। गुरुत्वञ्च ॥ * ॥ मानुषदुग्धगुणाः। प्राणधारकत्वम्। शरीरहितकारित्वम्। बृंहणत्वम्। तृप्तिजनकत्वञ्च ॥ * ॥ प्रत्यूषकाले गोदुग्धपानगुणाः। गुरुत्वम्। विष्टम्भित्वम्। दुर्ज्जरत्वम्। यस्मात् सूर्य्योदयात् परं यामं यामार्द्धमेव वा उत्तार्य्य पयो ग्राह्यम्। तत्पथ्यं दीपनं लघु ॥* विवर्णमावात्सतृमानां पयः दोषलम्। एकवर्णवत्सगोदुग्धं श्वेतवर्णकृष्णवर्णगोदुग्धञ्च प्रशस्तम् ॥ * ॥ इक्षुभक्षकमाषपर्णभक्षकोद्दृष्ट-गोदुग्धं पक्वमपक्वं वा हितकारकम् ॥ * ॥ पर्य्युषितदुग्धगुणाः। गुरुत्वम्। विष्टम्भित्वम्। दुर्ज्जरत्वञ्च ॥ * ॥ अपक्वदुग्धगुणाः। प्रायोऽभिष्यन्दित्वम्। गुरुत्वञ्च ॥ * ॥ शृतोष्णं कफवातनाशनम्। शृतशीतं पित्तनाशनम्। धारोष्णदुग्धं अमृततुल्यम्। स्त्रीस्तन्यदुग्धं विना सर्व्वमपक्वं दुग्धं त्याज्यम्। सलवणदुग्धं विग्रथितं नट इति ख्यातं दुग्धञ्च त्याज्यम् ॥ * ॥ दुग्धान्नगुणाः। चक्षुर्हितत्वम्। बलकारित्वम्। पित्तनाशित्वम्। रसायनत्वञ्च ॥ * ॥

"शाकाम्लफलपिण्याककुलत्थलवणामिषैः।
करीरदधिमाषैश्च प्रायः क्षीरं विरुध्यते ॥"
इति राजवल्लभः।

अथ चतुर्व्विधक्षीरगुणाः।

"कोऽप्याविकं पथ्यतमं शृतोष्णं
क्षीरं त्वजानां शृतशीतमाहुः।
दोहान्तशीतं महिषीपयस्यं
गव्यन्तु धारोष्णमिदं प्रशस्तम् ॥
वृष्यं बृंहणमग्निवर्द्धनकरं पूर्ब्बाह्णपीतं पयो
मध्याह्ने बलदायकं रतिकरं कृच्छ्रस्य विच्छेदनम्।
बाल्ये वह्निकरं ततो बलकरं वीर्य्यप्रदं वार्द्धके
रात्रौ क्षीरमनेकदोषशमनं सेव्यं ततः सर्व्वदा ॥
क्षीरं मुहूर्त्तत्रितयोषितं य-
दतप्तमेतद्विकृतिं प्रयाति।
यस्मात्तु दोषं कुरुते तदूर्द्ध्वं
विषोपमं स्यादुषितं दशानाम् ॥
जीर्णज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम्।
तदेव तरुणे पीतं विषवद्धन्ति मानुषम् ॥
क्षीरक्वाथगुणः।
चतुर्थभागं सलिलं निधाय
यत्नाद्दुग्धावर्त्तितमुत्तमं तत्।
सर्व्वामयघ्नं बलपुष्टिकारि
वीर्य्यप्रदं क्षीरमतिप्रशस्तम् ॥
गव्यं पूर्ब्बाह्णकाले स्यादपराह्णे तु माहिषम्।
क्षीरं सशर्करं पथ्यं यद्वा सात्म्यञ्च सर्व्वदा ॥
क्षीरं न भुञ्जीत कदाप्यतप्तं
तप्तञ्च नैतल्लवणेन सार्द्धम्।
पिष्टान्नसन्धानकमाषमुद्ग-
कोशातकीकन्दफलादिकैश्च ॥
तथा च,
मत्स्यमांसगुड़मुद्गमूलकैः
कुष्ठमावहति सेवितं पयः।
शाकजाम्बवरसादिसेवितं
मारयत्यबुधमाशु सर्पवत् ॥ * ॥
स्निग्धं शीतं गुरु क्षीरं सर्व्वकालं न सेवयेत्।
दीप्ताग्निं कुरुते मन्दं मन्दाग्निं नष्टमेव च ॥
नित्यन्तीव्राग्निना सेव्यं सुपक्वं माहिषं पयः।
पुष्यन्ति धातवः सर्व्वे बलपुष्टिविवर्द्धनम् ॥
क्षीरं गवाजकादेर्मधुरं क्षारं नवप्रसूतानाम्।
रूक्षञ्च पित्तदाहं करोति रक्तामयं कुरुते ॥*॥
मधुरं त्रिदोषशमनं क्षीरं मध्यप्रसूतानाम्।
लवणं मधुरं क्षीरं विदाहजननं चिरप्रसूतानाम् ॥
गुणहीनं निःसारं क्षीरं प्रथमप्रसूतानाम्।
मध्यमवयसां रसायनमुक्तमिदं दुर्ब्बलन्तु वृद्धानाम् ॥
तासां मासत्रयादूर्द्ध्वं गुर्व्विणीनाञ्च यत् पयः।
तद्वाहि लवणं क्षीरं मधुरं पित्तशोषकृत् ॥*॥
दुग्धान्नं शीतलं स्वादु वृष्यं वर्णकरं गुरु।
वातपित्तापहं रुच्यं बृंहणं बलवर्द्धनम् ॥"
इति राजनिर्घण्टः ॥ * ॥

अथ भावप्रकाशोक्तसामान्यदुग्धगुणाः।

"दुग्धं सुमधुरं स्निग्धं वातपित्तहरं सरम्।
सद्यःशुक्रकरं शीतं सात्म्यं सर्व्वशरीरिणाम् ॥
जीवनं बृंहणं बल्यं मेध्यं वाजीकरं परम्।
वयःस्थापकमायुष्यं सन्धिकारि रसायनम् ॥
विरेकवान्तिवस्तीनां तुल्यमोजोविवर्द्धनम्।
जीर्णज्वरे मनोरोगे शोषमूर्च्छाभ्रमेषु च ॥
ग्रहण्यां पाण्डुरोगे च दाहे तृषि हृदामये।
शूलोदावर्त्तगुल्मेषु वस्तिरोगे गुदाङ्कुरे ॥
रक्तपित्तातिसारे च योनिरोगे श्रमे क्लमे।
गर्भस्रावे च सततं हितं मुनिवरैः स्मृतम् ॥
बालवृद्धक्षतक्षीणाः क्षुद्व्यवायकृशाश्च ये।
तेभ्यः सदातिशयितं हितमेतदुदाहृतम् ॥"
इति भावप्रकाशः ॥

(दुग्धोत्पत्तिविवृतिर्यथा,—
"यद् यदाहारजातन्तु रसं क्षीरशिरानुगम्।
सरं जलञ्च शुक्रञ्च तथा पित्तेन संयुतम् ॥
पाचितं जाठरे वह्नौ पित्तेन सह मूर्च्छितम्।
पच्यमानं शिराप्राप्तं क्षीरं तद्विद्धि पुत्रक ! ॥
तेन क्षीरमिति ख्यातमग्निसोमात्मकं पयः।
अमृतं सर्व्वभूतानां जीवनं बलकृत्तमम् ॥
हारीतः संशयापन्नः पप्रच्छ पितरं पुनः।
कथं रसस्य सम्पत्तिः कथं सञ्चीयते विभो ! ॥
कथं रक्तस्य संस्थाने क्षीरं पाण्डुत्वमीयते।
कथं तत्र कुमारीणां बन्ध्यानां न कथं भवेत् ॥
एवं पृष्टो महाचार्य्यः प्रोवाच मुनिपुङ्गवः।
अति हर्षप्रदं पुत्र ! परिपृष्टं भिषग्वर ! ॥
सितास्निग्धं तथा रक्तं पित्तेन पाकतां गतम्।
रक्तं श्वेतत्वमायाति तथा क्षीरं सितं भवेत् ॥
क्षीरनाड्यः कुमारीणां बन्ध्यानां न कथं भवेत्।
अल्पधातुबलं यस्मात्तस्मात् क्षीरं न जायते ॥
बन्ध्यानां क्षीरनाड्यस्तु वातेन परिपूरिताः।
क्षीरञ्च न भवेत्तस्मादार्त्तवञ्चाधिकं यतः ॥
प्रसूतासु च नारीषु बलेन सह सूयते।
तेन स्रोतो विशुद्धिः स्यात् क्षीरमाशु प्रवर्त्तते ॥
तस्मात् सद्यः प्रसूतायां जायते श्लैष्मिकं पयः।
तेन काठिन्यमायाति तस्मात्तत् परिवर्ज्जयेत् ॥
पयश्चाविकृतं गाव्यां बलकृद्दोषनाशनम् ॥"
इति हारीते प्रथमे स्थाने अष्टमेऽध्याये ॥)

(कत्तृणम्। तत्पर्य्यायाश्च यथा,—
"कत्तृणं ध्यामकं दुग्धम्।" इति च वैद्यकरत्नमालायाम् ॥